# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – मार्च्-एप्रिल् २०१९

| | | |
|---|---|---|
| **कक्षा**–आचार्य-२(SEM-4) | **प्रश्नपत्रम्** – ४ | **गुणाः** – ७० |
| **विषयः** – साहित्यम् (अलङ्कारवर्गः) | **कोड- CC- 5412(1)** | **समयः** – ११ तः २ |
| **दिनाङ्कः** – ०२/०४/२०१९ | **सन्दर्भग्रन्थः**– चित्रमीमांसा | |

---

**॥ प्रथमान्वितिः ॥** (Unit-1)

**प्रश्नः १ अधो लिखितयोः एकस्य ससन्दर्भं व्याख्यां कुरुत । ०५**

१. बुद्धिः सर्वात्मनान्योन्याक्षेपिनानार्थसंश्रया ।
सादृश्यमूलावार्थस्पृक् सन्देहालङ्कृतिर्मता ॥

२. आरोप्यमाणमारोपविषयात्मतया स्थितम् ।
प्रकृतस्योपयोगि स्यात्परिणाम उदाहृतः ॥

**प्रश्नः २ अधोलिखितयो एकस्य उत्तरं सविस्तरं लिखत । १०**

१. ससन्देहालङ्कारं विवेचयन्तु ।

२. परिणामनिरूपणे विद्याधरोक्तमुदाहरणं सम्यक् व्याख्यायताम् ।

**॥ द्वितीयान्वितिः ॥** (Unit-2)

**प्रश्नः ३ एकस्य ससन्दर्भं व्याख्या कार्या । ०५**

१. गजत्रातेति वृद्धाभिः श्रीकान्त इति यौवतैः । यथास्थितश्च बालाभिर्दृष्टः शौरिः सकौतुकम् ॥

२. दामोदरकराघातचूर्णिताशेषवक्षसा । दुष्टं चाणूरमल्लेन शतचन्द्र नभस्तलम् ॥

**प्रश्नः ४ ग्रन्थोक्तदिशा भ्रान्तिमानलङ्कारः प्रतिपादनीयः । १०**

अथवा

**उल्लेखालङ्कारस्य भेदाः सोदाहरणं प्रतिपादनीयाः ।**

**॥ तृतीयान्वितिः ॥** (Unit-3)

**प्रश्नः ५ एकस्य ससन्दर्भं व्याख्या कार्या । ०५**

१. स्तनाभिरामस्तबकां नूनं सीतेति वल्लरीम् । संभावयन् रघुपतिर्धावति स्म दिदृक्षया ॥

२. अपि चाप्रकृतधर्मिकोत्प्रेक्षायां प्रकृतमित्यंशाभावादव्याप्तिः ।

**प्रश्नः ६ उत्प्रेक्षाभेदान् निरूप्य द्वयोः भेदयोः सविस्तरं विवेचनं विधातव्यम् । १०**

अथवा

अलङ्कारसर्वस्वकृतभेदप्रदर्शनं कृत्वा विद्यानाथभेदप्रदर्शनं प्रतिपादयन्तु ।

**॥ चतुर्थान्वितिः ॥** (Unit-4)

**प्रश्नः ७ एकस्य ससन्दर्भं व्याख्या कार्या । ०५**

१. नेदं नभोमण्डलमम्बुराशिर्नैताश्च तारा नवफेनपुञ्जाः ।
नायं शशी कुण्डलितः फणीन्द्रो नायं कलङ्कः शयितो मुरारिः ॥

२. प्रकृतस्य निषेधेन यदन्यत्वप्रकल्पनम् ।
साम्यादपह्नुतिर्वाक्यभेदाभेदवती द्विधा ॥

**प्रश्नः ८ अतिशयोक्त्यलङ्कारः लक्षणोदाहरणपूर्वकं सम्यग् व्याख्यायताम् ।** **१०**

अथवा

**ग्रन्थोक्तदिशा अपह्नुतिनिरूपणं सोदाहरणं भेदप्रदर्शनपूर्वकं करणीयम् ।**

**प्रश्नः ९ निम्नलिखितेभ्यः दशप्रश्नानाम् अतिलघूत्तराणि यच्छत ।** **१०**

१. चित्रमीमांसायां कति अलङ्काराणां विवेचनमस्ति?

२. अलङ्कारशब्दस्य कोऽर्थः?

३. अप्पयदीक्षितस्य केन सह विरोध आसीत्?

४. उल्लेखलक्षणं किम्?

५. भ्रान्तिमल्लक्षणं किम्?

६. का अतिव्याप्तिः?

७. अतिशयोक्तिः कतिविधा?

८. अप्पयदीक्षितस्य कः समयः?

९. किं लक्षणम् अतिशयोक्तेः?

१०. उत्प्रेक्षालक्षणं किम्?

११. प्राचीनाभिमतं ससन्देहलक्षणं किम्?

१२. उत्प्रेक्षालङ्कारस्य उदाहरणं लिखत ।

१३. अतिशयोक्तिः कदा भवति?

१४. अपह्नुतेः लक्षणं किम्?

१५. अतिशयोक्तिचातुर्विध्यं नामोल्लेखपूर्वकं प्रदर्शनीयम् ।

०००